ॐ श्रेष्ठो देवानां भगवो भगासि। तत्वा विदुः फल्गुनीस्तस्य वित्तात्। अस्मभ्यं क्षत्रमजरं सवीर्यं गोमदश्ववदुप संनुदेह॥१॥ भगो ह दाता भग इत् प्रदाता भगो देवीः फल्गुनीराविवेश॥ भगस्येत्तं प्रसवं गमेम यत्र देवैः सधमादं मदेम॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/१/१९-२०) भगाय स्वाहा। फल्गुनीभ्यां स्वाहा। श्रैष्ठ्याय स्वाहेति। (तैत्तिरीय ब्राह्मण, ३/१/४/४२-४४) किञ्च भगो अर्यमा सविता पुरन्धिः। (पारस्कर गृह्य सूत्रं) (वर्तमान् ज्योतिष ग्रन्थों में पूर्व उत्तर फाल्गुनी नक्षत्रों के भग अर्यमा देवता लिखा है)

१३. हस्त नक्षत्रं सविता देवता। तारा संख्या ५, हस्ताकारम्। देवस्य सवितुर्हस्तः। प्रसव परस्तात् सनिरवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/५) अरिष्ट वैकंकत समिधा। "हस्तोऽर्कः सविता सूर्यः प्रचण्ड रुचिरुष्णगुः तरणिस्तपनो मनुर्दिननाथस्तिथीश्वरः॥ दिवाकरः सहस्रांशुर्मार्तण्डो मिहिरो रविः॥१॥ सप्तः साप्तः स्मृतोभास्वानादित्यो ब्रह्म एव च॥ निशान्तको निशारिः स्याद्दिनेशो ध्वान्तनाशनः॥२॥ प्रार्थना मन्त्राः-ॐ विभ्राड् बृहत् पिवतु सोम्यं मध्वायुर्दधद्यज्ञपतावविं ह्रुतम्॥ वात जूतो योऽअभिरक्षतित्मनाप्रजाः पुपोष पुरुधा वि राजति ॥१३॥ (वाजसनेयी संहिता, ३३/३०) ॐ आयातु देवः सवितोपयातु। हिरण्ययेन सुवृता रथेन। वहन् हस्तं सुभगं विद्मनापसम्। प्रयच्छन्तं पपुरिं पुण्यमच्छ॥१॥ हस्तः प्रयच्छत्वमृतं वसीयः। दक्षिणेन प्रतिगृम्णीम एनत्॥ दातारमद्य सविता विदेय। यो नो हस्ताय प्रसुवाति यज्ञम्॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/१/२१-२२) सवित्रे स्वाहा। हस्ताय स्वाहा। ददते स्वाहा। प्रणते स्वाहा। प्रयच्छते स्वाहा। प्रतिगृभ्णते स्वाहेति॥ (तैत्तिरीय ब्राह्मण, ३/१/४/४५-५०)

१४. चित्रा नक्षत्रं त्वष्टा देवता। तारा १ इन्द्रनीलमणि मौक्तिकाकारम्। इन्द्रस्य चित्रा। ऋतं परस्तात्। सत्यमवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/५) श्री वृक्ष (बेल वृक्ष) समिधा। प्रार्थना मन्त्राः-ॐ त्वष्टा तुरीपो अद्भुत इन्द्राग्नी पुष्टिवर्धना॥ द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः॥ (वाजसनेयी संहिता, २१/२०)

ॐ त्वष्टा नक्षत्रमभ्येति चित्रां सुभँससंयुवतिँ रोचमानाम् ॥ निवेशयन्नमृतान्मर्त्याँ श्च। रूपाणि पिँशन् भुवनानि विश्वा॥१॥ तन्न त्वष्टा तदु चित्रा विचष्टां, तन्नक्षत्रं भूरिदा अस्तु मह्यम्। तन्न प्रजां वीरवतीं सनोतु गोभिर्नो अश्वैः समनक्तु यज्ञम्॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/१/२३-२४) त्वष्ट्रे स्वाहा। चित्रायै स्वाहा। चैत्राय स्वाहा। प्रजायै स्वाहेति॥ (तैत्तिरीय ब्राह्मण, ३/१/४/२४-२७)

१५. स्वाती नक्षत्रं वासुर्देवता। तारा १ प्रवालोपमम्। वायोर्निष्ट्या व्रततिः परस्तादसिद्धिरवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/१३) अर्जुन समिधा। त्वाष्ट्रश्चित्राऽथ वाताख्या स्वाती परमदैवतान्। समीरः श्वसनोवायुर्मारुतोऽथ समीरणः॥) प्रार्थना मन्त्राः-ॐ पीवो अन्ना रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुता मभिश्रीः। ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः॥१५॥ (वाजसनेयी संहिता, २७/२३) ॐ वायुर्नक्षत्रमभ्येति निष्ट्याम्। तिग्मशृङ्गो वृषभो रोरुवाणः। समीरयन् भुवना मातरिश्वा। अपद्वेषांसि नुदता मरातीः॥१॥ तन्नो वायुस्तदु निष्ट्या शृणोतु तन्नक्षत्रं भूरिदा अस्तु मह्यम्। तन्नो देवासो अनुजानन्तु काम्म्। यथा तरेम दुरितानि विश्वा॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/१/२५-२६) वायवे स्वाहा। निष्ट्यायै स्वाहा। कामचाराय स्वाहा। अभिजित्यै स्वाहेति। (तैत्तिरीय ब्राह्मण, ३/१/४/५५-५८)

१६. विशाखा नक्षत्रं इन्द्राग्नी देवता। तारा ४ तोरणाभं इन्द्राग्नियोर्विशाखे। युगानि परस्तात् कृषमाणा अवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/१४) आहिक (अगस्त) समिधा। "इन्द्राग्नीश्चापि शक्राग्नी विशाखश्च निगद्यते॥। प्रार्थना मन्त्राः- ॐ इन्द्राग्नी आ गतँ सुतं गीर्भिनभो वरेण्यम्। अस्यपातन्धियेषिता॥१६॥ (वाजसनेयी संहिता, ७/३१) ॐ दूरमस्मच्छत्रवो यन्तुभीताः। तदिन्द्राग्नी कृणुतां तद् विशाखे। तन्नो देवा अनुमदन्तु यज्ञम्। पश्चात् पुरस्तादभयं नो अस्तु॥१॥ नक्षत्राणामधिपत्नी विशाखे। श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ। विषूचः शत्रूनपबाधमानौ। अपक्षुधं नुदतामरातिम्॥२॥ पूर्णा पश्चादुत पूर्णा पुरस्तात्। उन्मध्यतः पौर्णमासी जिगाय। तस्यां देवा अधि संवसन्तः। उत्तमे नाक इह मादयन्ताम्॥३॥ पृथ्वी सुवर्चा युवतिः सजोषाः। पौर्णमास्युदगाच्छोभमाना। आप्याययन्ती दुरितानि विश्वा। उरुं दुहां यजमानाय यज्ञम्॥४॥ (तैत्तिरीय ब्राह्मण, ३/१/१/२७-३०) इन्द्राग्निभ्यां स्वाहा। विशाखाभ्यां स्वाहा। श्रेष्ठ्याय स्वाहा। अभिजित्यै स्वाहा। पौर्णमास्यै स्वाहा। कामाय स्वाहा। अगत्यै स्वाहेति। (तैत्तिरीय ब्राह्मण, ३/१/४/२४-२७)

१७. अनुराधा नक्षत्रं मित्रो देवता। तारा ४ बलि सदृशं । मित्रस्यानुराधाः। अभ्यारोहत् परस्तात्। अभ्यारूढमवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/१५) बकुल (मोलसिरि) समिधा। "अनुराधा स्मृतो मैत्रो वैशाखस्यानुजः स्मृतः॥ ध्यान मन्त्राः-ॐ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत। दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शँसत॥१७॥ (वाजसनेयी संहिता, ४/३५) ॐ ऋध्यास्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयं नो अस्तु। अनुराधान् हविषा वर्धयन्तः। शतं जीवेम शरदः सवीराः॥१॥ चित्रं नक्षत्र मुदगात् पुरस्तात्। अनुराधास इति यद् वदन्ती॥ तन्मत्र एति पथिभिर्देवयानैः। हिरण्ययैर्विततैरन्तरिक्षे। (तैत्तिरीय ब्राह्मण, ३/१/२) मित्राय स्वाहा। अनुराधेभ्यः स्वाहा। मित्रधेयाय स्वाहा। अभिजित्यै स्वाहेति। (तैत्तिरीय ब्राह्मण, ३/१/५/१-४)

१८. ज्येष्ठा नक्षत्रं इन्द्रो देवता। तारा ३ कुण्डल आकृतिः। इन्द्रस्य रोहिणी (ज्येष्ठा विपरीत दिगे) शृणत् परस्तात् प्रतिशृणन्तो अवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/५) प्रार्थना मन्त्राः-ॐ स इषु हस्तैः स निषङ्गिभिर्वशी सँस्रष्टा स युध इन्द्रो गणेन। सँ सृष्टजित् सोमपा बाहुवीर्या। शर्ध्युग्रधन्वा प्रतिहिताभिरस्ता।१८॥ (वाजसनेयी संहिता, १७/३५) ॐ इन्द्रो ज्येष्ठामनु नक्षत्रमेति। यस्मिन् वृत्रं वृत्र तूर्ये ततार। तस्मिन् वयममृतत्वं दुहानाः। क्षुधं तरेम दुरितिं दुरिष्टिम्॥१॥ पुरन्दराय वृषभाय धृष्णवे। अषाढाय सहमानाय मीढुषे। इन्द्राय ज्येष्ठा मधुमद् दुहाना। उरुं कृणोतु यजमानाय लोकम्॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/२/३-४) इन्द्राय स्वाहा। ज्यैष्ठायै स्वाहा। ज्यैष्ठ्याय स्वाहा अभिजित्यै स्वाहेति। (तैत्तिरीय ब्राह्मण, ३/१/५/५-८)

१९. मूलं नक्षत्रं निर्ऋतिर्देवता। तारा ११ सिंहपुच्छाकारम्। निर्ऋत्यै मूलबर्हणी। प्रतिभञ्जन्तः परस्तात्। प्रतिशृणन्तो ऽवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/१७) सर्ज (शर) समिधा) राक्षसो निर्ऋतिर्मूलं स्यादलक्ष्मीस्तु निर्ऋतिः। राक्षसः कौणपः क्रव्यात् क्रव्यादोस्रप आशरः॥१॥ रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः॥ यातुधानः पुण्यजनो नैर्ऋतौ यातु राक्षसी॥ ध्यान मन्त्राः- ॐ मातेव पुत्रं पृथिवी पुरुष्यमग्निँ स्वे योनावभारुखा। तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चतु॥ (वाजसनेयी संहिता, १२/६१) ॐ मूलं प्रजां वीरवतीं विदेय। प्राच्येतु निर्ऋतिः पराचा। गोभिर्नक्षत्रं पशुभिः समक्तम्। अहर्भूयाद्यजमानाय मह्यम्॥१॥ अहर्नो अद्य सुविते दधातु मूलं नक्षत्रमिति यद् वदन्ति। पराचीं वाचा निर्ऋतिं नुदामि। शिवं प्रजायै शिवमस्तु मह्यम्॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/२/५-६) मूलाय स्वाहा। प्रजायै स्वाहेति॥ (तैत्तिरीय ब्राह्मण, ३/१/५/१०-११)

२०. पूर्वाषाढा नक्षत्रं आपो देवता। तारा २ गजदन्त सदृशम्। अपां पूर्वा अषाढाः। वर्चः परस्तात् समितिः अवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/१८) वञ्जुल (जल वेतस) समिधा। 'पूर्वाषाढा जलाह्वयः। आपः स्त्री भूम्निवाः वारि सलिलं कमलं जलम्। पयः कीलालममृतं जीवनं भुवनं वनम्॥१॥ कबन्धमुदकं पाथः पुषकरं सर्वतोमुखं अम्भोर्णस्तोय पानीय नीरक्षीराम्बु शम्बरम्॥२॥ प्रार्थना मन्त्राः-ॐ अपाघमप किल्बिषमप कृत्यामपो रपः। अपामार्ग त्वमस्मदप दुःष्वप्न्यँ सुव॥२०॥ (वाजसनेयी संहिता, ३५/११) या दिव्या आपः पयसा सम्बभूवुः। या अन्तरिक्ष उत पार्थि वीर्याः। या सामषाढा अनुयन्ति कामम्। ता न आपः शँस्योना भवन्तु॥१॥ याश्च कूप्याः याश्च नद्याः समुद्रियाः। याश्च वैशन्ती रुत प्रा सचीर्याः। या सामाषाढा मधु भक्षयन्ति। ता न आपः शँस्यो ना भवन्तु॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/२/७-८) अद्भ्यः स्वाहा। आषाढाभ्यः स्वाहा। समुद्राय स्वाहा। कामाय स्वाहा। अभिजित्यै स्वाहेति। (तैत्तिरीय ब्राह्मण, ३/१/५/१२-१६)

२१. उत्तराषाढ नक्षत्रं विश्वेदेवा देवता। तारा २ मञ्चकं सदृशं। विश्वेषां देवानामुत्तराः। अभिजयत् परस्ताद् अभिजितम् अवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/१९) । पनस (कटहल) समिधा। "विश्वेचाप्युत्तराषाढा वैश्वदेवश्च कथ्यते।" ध्यानमन्त्राः-ॐ विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्यग्नयः समिद्धाः। विश्वेनो देवा अवसाऽऽगमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥२१॥ (वाजसनेयी संहिता, १८/३१, ३३/५२) ॐ तन्नो विश्वे उपशृण्वन्तु देवाः। तदषाढा अभिसंयन्तु यज्ञम्। तन्नक्षत्रं प्रथतां पशुभ्यः। कृषिर्वृष्टिर्यजमानाय कल्पताम् ॥१॥ शुभ्राः कन्या युवतयः सुपेशसः। कर्मकृतः सुकृतो वीर्यावतीः। विश्वान् देवान् हविषा वर्धयन्तीः। अषाढाः काममुपयान्तु यज्ञम्॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/२/९-१०) विश्वेभ्यो देवेभ्यः स्वाहा। अषाढाभ्यः स्वाहा। अनपजय्याय स्वाहा। जित्यै स्वाहेति॥ (तैत्तिरीय ब्राह्मण, ३/१/५/१७-२०)

२२. अभिजिन्नक्षत्रं ब्रह्म देवता। तारा ३ त्रिकोण सदृशम्। अभिजिन्नामनक्षत्रं। अभिजयत् परस्ताद् अभिजितं अवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/१९) श्रोणायै (तैत्तिरीय ब्राह्मण, १/५/२)। ब्रह्मात्मभूः सुरज्येष्ठ परमेष्ठी

पितामहः। हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः॥१॥ ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि। धियो यो नः प्रचोदयात्॥२२॥ (वाजसनेयी संहिता, ३/३५, २२/९, ३०/२)

ॐ यस्मिन् ब्रह्माऽभ्य जयत् सर्वमेतत्। अमुं च लोकमिदमूं च सर्वम्। तन्नो नक्षत्रमभिजिद्विजित्य। श्रियं दधात्व हृणीयमानम्। उभौ लोकौ ब्रह्मणा संजितेमौ। तन्नो नक्षत्रमभिजिद्विचष्टाम्। तस्मिन् वयं पृतनाः संजयेम। तन्नो देवासो अनुजानन्तु कामम्॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/२/११-१२) ब्रह्मणे स्वाहा। अभिजिते स्वाहा। ब्रह्मलोकाय स्वाहा। अभिजित्ये स्वाहेति॥ (तैत्तिरीय ब्राह्मण, ३/१/५/२१-२४)

२३. श्रवण नक्षत्रं विष्णुर्देवता। तारा ३ त्रिचरण सदृशं। विष्णोः श्रोणा पृच्छमानाः परस्तात् पन्था अवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/२०) "श्रवणो माधवो विष्णुरच्युतः केशवो हरिः। श्रीधरो दानवारिस्च शाङ्गर्पाणिश्च वामनः। श्रोणस्त्रिविक्रमस्तार्क्ष पक्षाच्छादित बालकः॥" अर्क (आक) समिधा। ध्यान मन्त्राः-इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम्। समूळ्हमस्य पाँसुरे स्वाहा॥ (वाजसनेयी संहिता, ५/१५) शृण्वन्ति श्रोणाममृतस्य गोपाम्। पुण्यामस्या उपशृणोमि वाचम्। महीं देवीं विष्णुपत्नीमजूर्याम्। प्रतीचीमेनाँ हविषा यजामः॥१॥ त्रेधा विष्णुरुरुगायो विचक्रमे। महीं दिवं पृथिवीमन्तरिक्षम्। तच्छ्रोणैति श्रव इच्छमाना। पुण्यँ श्लोकं यजमानाय कृण्वती॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/२/१३-१४) विष्णवे स्वाहा। श्रोणायै स्वाहा। श्लोकाय स्वाहा। श्रुताय स्वाहेति॥ (तैत्तिरीय ब्राह्मण, ३/१/५/२५-२८)

२४. धनिष्ठा नक्षत्रं वसवो देवताः। तारा ४ मर्दलाकारं। वसूनां श्रविष्ठाः। भूतं पुरस्ताद् भूतिरवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/२१) शमी (जांटी) समिधा। "धनिष्ठा च धनं वसुः। विनायको विघ्नराज द्वैमातुर गणाधिपाः। अप्येकदन्तो हेरम्ब लम्बोदर गजाननः।" ध्यान मन्त्राः-ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥ (वाजसनेयी संहिता, १/३) अष्टौ देवा वसवः सोम्यासः। चतस्रो देवीरजराः श्रविष्ठाः ते यज्ञं पान्तु रजसः परस्तात्। संवत्सरीणममृतँ स्वस्ति॥१॥ यज्ञं नः पान्तु वसवः पुरस्तात्। दक्षिणतोऽभियन्तु श्रविष्ठाः। पुण्यं नक्षत्रमभिसंविशाम। मा नो अरातिरघशँसागन्॥२॥ (अग्रं ह वै समानानां पर्येति) (तैत्तिरीय ब्राह्मण, ३/१/२/१५-१६) वसुभ्यः स्वाहा। श्रविष्ठाभ्यः स्वाहा। अग्राय स्वाहा। परीत्यै स्वाहेति॥ (तैत्तिरीय ब्राह्मण, ३/१/५/२९-३२)

२५. शततारका नक्षत्रं वरुणो देवता। तारा १०० वर्तुलाकाम्। इन्द्रस्य शतभिषक्। विश्वव्यचाः परस्ताद्विश्वक्षिति रवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/२२) कदम्ब समिधा वैकंकती वा। "वरुणो वारुणख्यातः शतभीषात्वम्बुराट् भवेत्॥ ध्यान मन्त्राः- ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भ सर्जनीस्यो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमा सीदं॥ (वाजसनेयी संहिता, ४/३६) क्षत्रस्य राजा वरुणोऽधिराजः। नक्षत्राणां शतभिष्ग्वसिष्ठः। तौ देवेभ्यः कृणुतो दीर्घमायुः। शतं सहस्रा भेषजानि धत्तः॥१॥ यज्ञं नो राजा वरुण उपयातु। तन्नो विश्वे अभिसंयन्तु देवाः। तन्नो नक्षत्रं शतभिषग्जुषाणम्। दीर्घमायुः प्रतिरद् भेषजानि॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/२/१७-१८) वरुणाय स्वाहा। शतभिषजे स्वाहा। भेषजेभ्यः स्वाहेति॥ (तैत्तिरीय ब्राह्मण, ३/१/५/३३-३५)

२६. पूर्वभाद्रपदा नक्षत्रं अजैकपात् देवता। तारा २ मञ्चक सदृशं। अजस्यैकपदः पूर्वे प्रोष्ठपदाः। वैश्वानरं परस्ताद् वैश्वावसवमवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/२३) आम्रं (चूत वृक्ष) समिधा। "अजैकपात् स्मृतो नित्यं पूर्वाभाद्रपदा बुधैः॥" ध्यान मन्त्राः- ॐ उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात् पृथिवी समुद्रः। विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु। (वाजसनेयी संहिता, ३४/५३) अज एकपादुदगात्पुरस्तात्। विश्वा भूतानि प्रतिमोदमानः। तस्य देवाः प्रसवं यन्ति सर्वे। प्रोष्ठपदासो अमृतस्य गोपाः॥१॥ बिभ्राजमानः समिधान उग्रः। आन्तरिक्षमरुहदगं द्याम्। तं सूर्यं देवमजमेकपादम्। प्रोष्ठपदासो अनुयन्ति सर्वे॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/२/१९-२०) अजायैकपदे स्वाहा। प्रोष्ठपदेभ्यः स्वाहा। तेजसे स्वाहा। ब्रह्मवर्चसायस्वाहेति॥ (तैत्तिरीय ब्राह्मण, ३/१/५/३६-३९)

२७. उत्तरा भाद्रपदा नक्षत्रं अहिर्बुध्निय देवता। तारा २ वलयाकारम्। अहेर्बुध्नियस्योत्तरे अभिषिञ्चन्तः परस्तादभिशृण्वन्तोऽवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/२४) पिचुमन्द (नीम) समिधा। "स्यादुत्तरता भाद्रपदस्त्वहिर्बुध्न्यश्च कथ्यते।" ॐ शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिँसीः। नि वर्त्तयाम्यायुषे ऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय॥ (वाजसनेयी संहिता, ३/६३) अहिर्बुध्नियः प्रथमा न एति। श्रेष्ठो देवानामुत मानुषाणाम्। तं ब्राह्मणाः सोमपाः सोम्यासः। प्रोष्ठपदासो अभिरक्षन्ति सर्वे॥१॥ चत्वार एकमभिकर्म

देवाः। प्रोष्ठपदास इति यान् वदन्ति। ते बुध्नियं परिषद्यँ स्तुवन्तः। अहिँ रक्षन्ति नमसोपसद्य॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/२/२१-२२) अहयेबुध्नियाय स्वाहा। प्रोष्ठपदेभ्यः स्वाहा। प्रतिष्ठायै स्वाहेति॥ (तैत्तिरीय ब्राह्मण, ३/१/५/४०-४२) २८. रेवती नक्षत्रं पूषा देवता। तारा ३२ मृदङ्गाकारं। पूष्णो रेवती। गावः परस्तात्। वत्सा अवस्तात्। (तैत्तिरीय ब्राह्मण, १/५/१/२५) मधु वृक्ष (मुलेठी) समिधा। "अन्त्यभं रेवती पौष्णं पूषा चेतीवनामतः। एतानाक्षत्रजाः संज्ञा यत्ने नोक्ता मया स्फुटम्" (राजमार्तण्डोक्ताः) । ध्यान मन्त्राः-ॐ पूषन् तव व्रते वयं न रिष्येम कदा चन। स्तोतारस्त इह स्मसि॥(वाजसनेयी संहिता, ३४/४१) पूषा रेवत्यन्वेति पन्थान्। पुष्टिपती पशुपा वाजवस्त्यौ। इमानि हव्या प्रयता जुषाणा। सुगैर्नो यानैरुपयातां यज्ञं॥१॥ क्षुद्रान् पशून् रक्षतु रेवती नः। गावो नो अश्वाँ अन्वेतु पूषा। अन्नं रक्षन्तौ बहुधा विरूपं। वाजं सनुतां यजमानाय यज्ञम्॥२॥ (तैत्तिरीय ब्राह्मण, ३/१/२/२३-२४) पूष्णे स्वाहा। रेवत्यै स्वाहा। पशुभ्यः स्वाहेति। (तैत्तिरीय ब्राह्मण, ३/१/५/४३-४५) इति नक्षत्र कल्पः॥

१२. वेदोक्त राशि विज्ञान

अथ राशि कल्पः। तत्रादौ (१) मेष राशिः। तारा ४२, पुञ्ज तारा । लैटिन ऐरिस। अंग्रेजी रैम। संस्कृत क्रिय, ओज, अज, मेढ्र, उरभ्र, उरण, ऊर्णायुः, वृष्णिः प्रथम राशिः। ॐ नेमि नमन्ति चक्षसा "मेषं" विप्रा अभिस्वरा। सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः॥१॥ (अथर्व सं. २०/५४/३)

(२) वृषभ राशिः। तारा २००, पुञ्ज तारा २९। लैटिन टारस, अंग्रेजी बुल, वृष, उक्षा, गौ, गोपति, तावुरि, द्वितीय राशिः। ॐ अनड्वाहमन्वारभामहे सौरभेयं स्वस्तये। स न इन्द्र इव देवेभ्यो वह्निः सन्तारणो भव॥ (वाजसनेयी संहिता, ३५/१३) ककुभँ रूपं वृषभस्य रोचते, बृहच्छुक्रः शुक्रस्य पुरोगाः। यत्ते सोमादाभ्यन्नाम जागृवि, तस्मै त्वा गृह्णामि तस्मै ते सोम सोमाय स्वाहा॥ (वाजसनेयी संहिता, ८/४९)

(३) मिथुन राशिः। तारा ८३, पुंज तारा १९, लैटिन जेमिनाइ, अंग्रेजी ट्विन्स। संस्कृत नृयुग्म, नृयुग, वीणा, यमल, जितुम, मन्मथ, तृतीय राशिः। ॐ लोहितेन (आर्द्रया) स्वधितिना मिथुनं कर्णयोः कृधि। अकर्तामश्विना लक्ष्म तदस्तु प्रजया बहु॥ (अथर्व सं. ६/१४१/२) अव त्मना भरते केतवोदा, अव त्मना भरते फेनमुदन्। क्षीरेणस्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः॥ युयोप नभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः। अञ्जसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरन्ते॥ (ऋक् सं, १/१०४/३-४) (नृमिथुनं सगदं सवीनम्) वराहः॥

(४) कर्क राशिः। तारा ८, पुञ्जतारा ६, लैटिन कैन्सर, अंग्रेजी क्राव। सं. कुलीर, कर्कट, ककि, अब्ज, आयुः, जीवः, चतुर्थ राशिः। ॐ अन्तरिक्षेण सह वाजिनीवान् कर्की वत्सामिह रक्ष वाजिन्। इमे ते स्तोका वहुला एहि -अर्वाङ् इयन्ते कर्कीह ते मनः अस्तु॥ (अथर्व सं. ४/३८/६)

(५) सिंह राशिः। तारा ९३, पुंज तारा १७, लैटिन लीओ, अंग्रेजी लायन। सं. हरि, मृगेन्द्र, पञ्चास्य, हर्यक्ष, केसरी, लेय, पञ्चम राशिः। ॐ (अजा वृत इन्द्र शूरपत्नी द्यां च येभिः पुरुहूत नूनम्) रक्षो अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि वस्तोः॥ (ऋक् सं. १/१७४/३) एना व्याघ्रं परिषस्वजानाः सिंहं हिन्वति महते सौभगाय। समुद्रं न सुभुवस्तस्थिवांसं मर्मृज्यन्ते द्वीपिनमप्स्वन्तः॥ (अथर्व सं. ४/८/७) (आविष्टयो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे) उभे त्वष्टुर्विभ्यतुर्जायमानात् प्रतीची सिंहं प्रति जोषयेते॥ (ऋक् सं. १/९५/५)

(६) कन्या राशिः। तारा ११७ पुञ्ज तारा १५। लैटिन वर्गो, अंग्रेजी वर्जिन्। सं. कन्यका, युवति, योषित्, षष्ठी, तरणी, नौका, तरुणी, कुमारी, पन्था, वहा, प्रवहा, षष्ठी राशिः। ॐ पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात। ग्राभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यं सत्। (ऋक् सं. ६/४९/७) प्रथम भाजं यशसं वयोधां सुपाणिं देवं सगभस्ति मृभ्वम्। होता यक्ष द्यजतं पस्त्याना मग्निस्त्वष्टारं सुहवं विभावा॥ (ऋक् सं. ६/४९/९) उत ग्ना व्यन्तु देव पत्नीरिन्द्राण्यग्नाय्यश्विनीराट्। (ऋक् सं. ५/४६/८) अग्र एति युवति रह्रयाणा प्राचिकितत् सूर्य यज्ञमग्निम्। अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तुभद्राः॥२७॥ (ऋक् सं. ७/८०/२-३) एता उ त्या उषसः केतुमक्रत, पूर्वे अर्धे रजसो भानुमञ्जते॥ (ऋक् सं. १/९२/१) अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः। (ऋक् सं. १/९२/३) पशून्न चित्रा सुभगा प्रथाना सिन्धुर्न क्षोद उर्विया व्यश्वैत्॥ (ऋक् सं. १/९२/१२)

(७) तुला राशिः। तारा ६६, पुंज तारा ७, लैटिन लिब्रा, अंग्रेजी बैलेन्स। संस्कृत-तुला, वणिज, पथ, तौलि, जूक, घट, मूक, वणिजाख्य, तुलाधर, तौलपात्र, सप्तमराशि। ॐ आज्यस्य परमेष्ठिन् जातवेदस्तनू वशिन्। अग्ने तौलस्य प्राशान

यातुधानान् विलापय (अथर्व संहिता, १/७/२)। इडे रन्ते हव्ये काम्ये चन्द्रे ज्योते ऽदिते, सरस्वति महि विश्रुति। एता ते अघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूयात्। (वाजसनेयी संहिता, ८/४३) एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि। क्रतुं दधिक्रा अनु संसनिष्यदत् पथां अंकांसि अन्वापनीफणत् स्वाहा॥ (वाजसनेयी संहिता, ९/१४)

(८) वृश्चिक राशिः। तारा ६०, पुञ्ज तारा १७, लैटिन स्कार्पिओ, अंग्रेजी स्कार्पिअन्। संस्कृत-अलि, द्रुण, कौर्प्य, कीट, पृदाकुः। ॐ यस्ते सर्पो वृश्चिक स्तृष्टदश्मा हेमन्तजब्धो भृमलौ गुहाशये। कृमिर्जिन्वत् पृथिवियद्यदेजति प्रावृषितन्नः सर्पन्मोसृपद् यच्छिवं तेन नो मृड। (अथर्व संहिता, १०/१/४६)

(९) धनु राशिः। पुंज तारा १४। लैटिन सागिटेरिअस्, अंग्रेजी आर्चर। संस्कृत-अस्त्रं, धनुश्च कोदण्ड धरश्चापश्च तौक्षिकः। अश्वीनरोऽश्व जघनः धनं धन्वन्तरिः। नवम राशिः। ॐ दिवो मूलमवततं पृथिव्या अध्युत्ततम्। तेन सहस्रकाण्डेन परि णः पाहि विश्वतः॥ (अथर्व सं. २/७/३) परि मां परि मे प्रजां परि णः पाहि यद्धनम्। अरातिर्नो मा तारीन्मा नस्तारिषुरभिमातयः॥ (अथर्व सं. २/७/४) उदगातां भगवती विचृतौ नाम तारके। वि क्षेत्रियस्य मुञ्चतामधमं पाशमुत्तमम्। (अथर्व संहिता २/८/१) यौ श्याव अश्वं अवथः वर्धि अश्वं मित्रावरुणा पुरुमीढं अत्रिम्। यौ विमदं अवथः सप्त वध्रिं तौ नः मुञ्चतं अंहसः॥ (अथर्व संहिता, ४/२९/४)

(१०) मकर राशिः। तारा संख्या ६४, पुञ्ज तारा ७। लैटिन कैप्रिकौर्नस्, अंग्रेजी गोट। संस्कृत-मृग, नक्र, दशम राशिः। "आकः केरो मृगश्चापि मृगास्यो मकरस्तथा। हरिणश्च। ॐ यदक्रन्दः प्रथमं जायमान उद्यंत्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहूं उपस्तुत्य महिजातं ते अर्वन्॥ (ऋक् संहिता, १/१६३/१)

(११) कुम्भ राशिः। तारा ११७, पुञ्ज तारा १५। लैटिन अक्वेरिअस्, अंग्रेजी वाटर। संस्कृत- कुम्भ। ॐ एमां कुमारस्तरुण आवत्सो जगता सह। एमां परिस्रुतः कुम्भ आ दध्नः कलशैरगुः। (अथर्व संहिता, ३/१२/७) पूर्णः कुम्भोऽधि काल आहितस्तं वै पश्यामो बहुधा नु सन्तः।स इमा विश्वा भुवनानि प्रत्यङ् कालं तमाहुः परमे व्योमन्॥ (अथर्व संहिता, १९/५३/३)

(१२) मीन राशिः। तारा ११६, पुञ्ज तारा ११। लैटिन पिसेज, अंग्रेजी फिश् । संस्कृत-मीन, मत्स्य, अन्त्यभं। ॐ आण्डेव भित्त्वा शकुनस्य गर्भ मुदुस्त्रियाः पर्वतस्यत्मनाजत्। अश्नापिनद्धं मधुपर्यपश्य मत्स्यं न दीन उदनि क्षियन्तम्॥ (अथर्व संहिता, २०/१६/७-८)

१३. नक्षत्र तथा योगतारा

इनका स्थान २७ सम विभाग तथा अभिजित् सहित २८ विषम विभाग के दिते जाते हैं। संस्कृत नाम श्री काली नाथ मुखर्जी की पुस्तक Popular Hindu Astronomy के आधार पर है।

नक्षत्र	आरम्भ विन्दु (सम भाग) राशि-अंश-कला	आरम्भ विन्दु विषम भाग) राशि-अंश-कला	योगतारा निरयन अंश (बर्जेस) राशि-अंश-कला	संस्कृत नाम (मुखर्जी)
अश्विनी	० ० ०	० ० ०	β Arietis ० १० ७	१ मेषस्य
भरणी	० १३ २०	० १३ ११	41 Arietis ० २४ २१	३ मेषस्य
कृत्तिका	० २६ ४०	० १९ ४६	η Tauri १ ६ ८	२० वृषस्य
रोहिणी	१ १० ०	१ २ ५६	α Tauri १ १५ ५६	१ वृषस्य
मृगशिरा	१ २३ २०	१ २२ ४२	λ Orionis १ २९ ५१	११ मृगस्य
आर्द्रा	२ ६ ४०	२ ५ ५३	α Orionis २ ४ ५४	२ मृगस्य
पुनर्वसु	२ २० ०	२ १२ २८	β Geminorum २ २९ २२	१ मिथुनस्य
पुष्य	३ ३ २०	३ २ १४	δ Cancri ३ १४ ५२	३ कर्कटस्य
अश्लेषा	३ १६ ४०	३ १५ २५	ε Hydrae ३ १८ २९	२ ह्रद सर्पस्य

मघा	४ ० ०	३ २२ ०	α Leonis ४ ५ ५८	१ सिंहस्य
पूर्वा फाल्गुनी	४ १३ २०	४ ५ ११	δ Leonis ४ १७ २७	४ सिंहस्य
उत्तरा फाल्गुनी	४ २६ ४०	४ १८ २१	β Leonis ४ २७ ४६	२ सिंहस्य
हस्त	५ १० ०	५ ८ ७	δ Corvi ५ १९ ३६	२ कर्कटस्य
चित्रा	५ २३ २०	५ २१ १८	α Virginis ५ २९ ५९	१ कन्याः
स्वाती	६ ६ ४०	६ ४ २८	α Bootis ६ ० २३	निष्ठ्या
विशाखा	६ २० ०	६ ११ ३	α Libra ६ २१ १४	१ तुलस्य
अनुराधा	७ ३ २०	७ ० ४९	δ Scorpii ७ ८ ४३	५ वृश्चिकस्य
ज्येष्ठा	७ १६ ४०	७ १४ ०	α Scorpii ७ १५ ५४	१ वृश्चिकस्य
मूल	८ ० ०	७ २० ३५	λ Scorpii ८ ० ४४	२ वृश्चिकस्य
पूर्वाषाढ़	८ १३ २०	८ ३ ४६	δ Sagittarii ८ १० ४३	३ धनुषः
उत्तराषाढ़	८ २६ ४०	८ १६ ५६	σ Sagittarii ८ १८ ३२	२ धनुषः
अभिजित्		९ ६ ४२	α Lyrae ८ २१ २७	१ विनयः
श्रवण	९ १० ०	९ १० ५७	α Aquilae ९ ७ ५५	१ गरुडस्य
धनिष्ठा	९ २३ २०	९ २४ ७	β Delphini ९ २२ २९	१ श्रविष्ठास्य
शतभिषक्	१० ६ ४०	१० ७ १८	λ Aquarii १० १७ ४३	७ कुम्भस्य
पूर्व भाद्रपद	१० २० ०	१० १३ ५३	α Pegasi १० २९ ३८	३ पक्षिराजस्य
उत्तर भाद्रपद	११ ३ २०	१० २७ ४	γ Pegasi ११ १५ १८	१ ध्रुवमातुः
रेवती	११ १६ ४०	११ १६ ४९	ζ Piscium ११ २६ १	६ मीनस्य

ग्रीक वर्णमाला-α = Alpha, β = Beta, γ = Gamma, δ = Delta, ε = Epsilon, θ = Theta, η = Eta, λ = Lambda, μ = Myu, φ = Phi, σ = Sigma, ζ = Zeta. ι = iota, κ = kappa, ν = nu, ξ = Xi, ο = omicron, π = pai, ρ = rho, σ = sigma, τ = Tau, υ = Upsilon, χ = Chi, ψ = Psi, ω = Omega. Ω-capital omega

विषम तारा विभाग-उनके आकार तथा योग तारा का स्थान सिद्धान्त दर्पण, प्रकाश १२ के अनुसार दिया जा रहा है।

दस्रादीनां ध्रुवांशाः स्यु-र्व्यङ्घ्रि-काष्ठाः (१-९/४५) कु-बाहवः (२-२१)।
सपादे-ष्व-ग्नयः (३-३५/१५) सार्ध-षड्-वेदाः (४-४६/३०) साङ्घ्रि-ख-र्त्तवः (६-६०/१५)॥२॥

अश्विनी आदि नक्षत्रों का ध्रुवांश (क्रान्ति वृत्त में मेष ०° से दूरी) इस प्रकार है-१. अश्विनी (९/४५), २. भरणी (२१/२), ३. कृत्तिका (३५/१५), ४. रोहिणी (४६/३०), ५. मृगशिरा (६०/१५),

शर-षट् (६-६५) साङ्घ्रि-शून्या-ङ्काः (७-९०/१५), कृताशा (८-१०४) वसु-खे-न्दवः (९-१०८)।
रसा-र्काः (१०-१२६) सार्द्ध-वह्नी-न्द्रा (११-१४३/३०) राम-बाण-हिमांशवः (१२-१५३)॥३॥

६. आर्द्रा (६५), ७. पुनर्वसु (९०/१५), ८. पुष्य (१०४), ९. अश्लेषा (१०८), १०. मघा (१२६), ११. पूर्वाफाल्गुनी (१४३), १२. उत्तराफाल्गुनी (१५३),

शर-भूपा (१३-१६५) नव-घना (१४-१७९) त्रि-नन्द-सितभानवः (१५-१९३)।
नगा-भ्र-पक्षाः (१६-२०७) सार्द्धा-ष्ट-भू-भुजा (१७-२१८/३०) रस-दृग्-दृशः॥४॥

१३. हस्त (१६५), १४. चित्रा (१७९), १५. स्वाती (१९३), १६. विशाखा (२०७), १७. अनुराधा (२१८/३०),

अर्द्धोना (१८-२२५/३०) स्त्र्यंश-हीने-न्दु-सिद्धाः (१९-२४०/४०) ख-शर-बाहवः (२०-२५०)।

अर्द्धयुक्-तर्क-तत्त्वानि (२१-२५६/३०) दलोना-द्री-षु-बाहवः (० अभिजित्-२५६/३०)॥५।
१८. ज्येष्ठा (२२५/३०), १९. मूल (२४०/४०), २०. पूर्वाषाढ़ (२५०), २१. उत्तराषाढ़ (२५६/३०), (०) अभिजित् (२५६/३०),
त्रि-भानि (२२-२७३) सार्द्ध-पञ्चा-ष्ट-पक्षा (२३-२८५/३०) व्यङ्घ्य-षट्-भू-गुणाः (२४-३१७/४५)।
दृग्-दन्ता (२५-३२२) दन्ति-गीर्वाणाः (२६-३३८) शून्यं (२७-०) साभिजिता-मिति॥६॥
२२. श्रवण (२७३), २३. धनिष्ठा (२८५/३०), २४. शतभिषक् (३१७/४५), २५. पूर्वभाद्रपद (३२२), २६. उत्तरभाद्रपद (३३८), २७. रेवती (०)।
क्रान्त्यन्ता-देषामथ विक्षेपांशा दलाढ्य-दिश (१-१०/३०) ईशाः (२-११)।
साङ्घ्य-ब्धयः (३-४/१५) सहार्द्धे-न्द्रियाणि (४-५/३०) सार्द्धा-नल-क्षितयः (५-१३/३०)॥७॥
नक्षत्र-मण्डल के योगतारा का शर या क्रान्तिवृत्त से उत्तर या दक्षिण दिशा में उनकी दूरी कही जाती है-१. अश्विनी (उत्तर १०/३०), २. भरणी (उ. ११), ३. कृत्तिका (उ. ४/१५), ४. रोहिणी (दक्षिण ५/३७), ५. मृगशिरा (द. १३/३०),
त्र्यंशोन-तर्क-चन्द्राः (६-१५/४०) सार्द्ध-रसाः (७-६/३०) साङ्घ्रि-रूप (८-१/१५) मर्काश्च (९-१२)।
रूप-दलं निज-षष्ठांशोनित (१०-०/२५) मर्थेन्दवो (११-१५) विश्वे (१२-१३)॥८॥
६. आर्द्रा (द. १५/४०), ७. पुनर्वसु (उ. ६/३०), ८. पुष्य (उत्तर १/१५), ९. अश्लेषा (द. १२), १०. मघा (उ. ०/२५), ११. पूर्वाफाल्गुनी (उ. १२), १२. उत्तराफाल्गुनी (उ. १३),
रुद्राः (१३-११) स-रसांश-दृशौ (१४-२/१०) देवा (१५-३३) बाहु (१६-२) भुजौ (१७-२ सपाद-कृताः (१८-४/१५)।
सदला-नल-रजनीशाः (१९-१३/३०) सार्द्धा-ङ्गा (२०-६/३०) व्यत्रिभाग-कृताः (२१-३/४०)॥९॥
१३. हस्त (द. ११), १४. चित्रा (द. २/१०), १५. स्वाती (उ. ३३/०), १६. विशाखा (द. २/०), १७. अनुराधा (द. २/०), १८. ज्येष्ठा (द. ४/१५), १९. मूल (द. १३/३०), २०. पूर्वाषाढ़ (द. ६/३०), २१. उत्तराषाढ़ (द. ३/४०),
द्राषष्टि (० अभिजित्-६२) रभ्र-रामाः (२२-३०) षट्-त्रिंश (२३-३६) च्छीतदीधिते-स्त्र्यंशः (२४-०/२०)।
दन्ता (२५-३२) गज-भुज-सङ्ख्या (२६-२८) शरा (२७-५) इति शराः क्रमाद्-भानाम्॥१०॥
(०) अभिजित् (उ. ६२/०), २२. श्रवण (उ. ३०/०), २३. धनिष्ठा (उ. ३६/०), २४. शतभिषक् (द. ०/२०), २५. पूर्वभाद्रपद (उ. ३२/०), २६. उत्तरभाद्रपद (उ. २८/०), २७. रेवती (उ. ५/०)।
ब्रह्म-त्रयस्य (४/५/६) राधा-षट्क (१६/१७/१८/१९/२०/२१) स्याहेः (९) करस्य (१३) चित्रायाः (१४)।
वरुणस्य च (२४) विक्षेपो याम्यः सौम्योऽपर-र्क्षाणाम्॥११॥
निम्नलिखित नक्षत्रों का विक्षेप दक्षिण दिशा में होता है-(४, ५, ६, १६, १७, १८, १९, २०, २१,९, १३, १४, २४)। बाकी नक्षत्रों का विक्षेप उत्तर दिशा में होता है। (विक्षेप पहले ही दिखाया जा चुका है)।
रामा (१-३) गुणाः (२-३) षड् (३-६) विषया (४-५) हुताशा (५-३),
रूपं (६-१) शरा (७-५) वह्नय (८-३) आशुगाश्च (९-५)।
बाणा (१०-५) दृशौ (११-२) युग्म (१२-२) मथेन्द्रियाणि (१३-५),
धरा (१४-१) स्थिरा (१५-१) पञ्च (१६-५) नगाश्च (१७-७) रामाः (१८-३)॥१२॥
(नक्षत्रों में तारा संख्या)-१. अश्विनी (३), २. भरणी (३), ३. कृत्तिका (६), ४. रोहिणी (५), ५. मृगशिरा (३), ६. आर्द्रा (१), ७. पुनर्वसु (५), ८. पुष्य (३), ९. अश्लेषा (५), १०. मघा (५), ११. पूर्वाफाल्गुनी (२), १२. उत्तराफाल्गुनी (२), १३. हस्त (५), १४. चित्रा (१), १५. स्वाती (१), १६. विशाखा (५), १७. अनुराधा (७), १८. ज्येष्ठा (३),
नन्दाः (१९-९) सम्द्रा (२०-४) निगमा (२१-४) गुणाश्च (२२-३),
रामाः (०-३) शराः (२३-५) खा-भ्र-भुवो (२४-१००) भुजौ (२५-२) च।
दृशौ (२६-२) द्वि-रामा (२७-३२) इति तारकाणां सङ्ख्योदिता साभिजितां क्रमेण॥१३॥
१९. मूल (९), २०. पूर्वाषाढ़ (४), २१. उत्तराषाढ़ (४), (०) अभिजित् (३), २२. श्रवण (३), २३. धनिष्ठा (५), २४. शतभिषक् (१००), २५. पूर्वभाद्रपद (२), २६. उत्तरभाद्रपद (२), २७. रेवती (३२)। ये विभिन्न नक्षत्रों में तारा संख्या हैं।

जीवर्क्ष (८) मध्ये बहु-तारकाणां स्थितावपि व्यक्ततया विनाद्यैः।
एकत्व-मुक्तं कतिचिद्-विभिन्न-सङ्ख्यानि-भानी-त्यपरे वदन्ति॥१४॥
८. पुष्य नक्षत्र में अनेक तारा रहने पर भी वे स्पष्ट नहीं दीखने के कारण मेरे मत से एक ही तारा है। कई आचार्य अनेक नक्षत्रों में ताराओं की संख्या भिन्न भिन्न कहते हैं।
ऋक्ष-चयस्या-कृतयः प्रत्यय-हेतो-रथा-भिधास्यते।
तुरग-वदन (१) त्रिकोन (२) ज्वलन-शिखा (३) नः (४) सदृक्षास्ताः॥१५॥
अब नक्षत्रों की आकृति का वर्णन किया जाता है। अश्विनी का रूप घोड़े के मुंह के समान, २. भरणी त्रिकोण आकार का, ३. कृत्तिका अग्निशिखा के समान, तथा ४. रोहिणी-गाड़ी (शगड़) या बैलगाड़ी के समान।
मार्ज्जार-पाद (५) विद्रुम (६) कार्म्मुक (७) कठिनी-रजः (८) श्वपुच्छ (९) निभाः।
लाङ्गल (१०) भार-समाभे (११) भार (१२) कराभे (१३) च मुक्ताभा (१४)॥१६॥
५. मृगशिरा-बिल्ली के पैर या मृग के मुख के समान, ६. आर्द्रा-मूंगा (मणि) या बून्द की तरह, ७. पुनर्वसु-धनुष के समान, ८. पुष्य-खल्ली (chalk) के टुकड़े या तीर की तरह,, ९. अश्लेषा-कुत्ते की पूंछ के समान, १०. मघा-हल की तरह, (५), ११. पूर्वाफाल्गुनी और १२. उत्तराफाल्गुनी-दोनों का आकार भार (कांवर) या लाठी के दोनों तरफ लटकाये भार के समान, १३. हस्त-हाथ के समान, १४. चित्रा-मोती के समान,
माणिक्य (१५) तोरण (१६) फणि (१७) क्रोड़रद (१८) कम्बुं (१९) सूर्प (२०) सदृश-तनवः।
सूर्पा (२१) ग्निबिम्ब (०) सायक (२२) म्रज (२३) वितान (२४) प्रतीकाशाः॥१७॥
१५. स्वाती-माणिक्य या मूंगा जैसा, १६. विशाखा-तोरण (छप्पर) की तरह, १७. अनुराधा-सांप के फण के समान, १८. ज्येष्ठा-सूअर के दांत की तरह, १९. मूल-शंख के समान, २०. पूर्वाषाढ़ और २१. उत्तराषाढ़-दोनों सूप की तरह (या हाथी दांत की तरह), (०) अभिजित्-अग्नि बिम्ब की तरह या त्रिकोण, २२. श्रवण-शर (तीर) की तरह या वामन, २३. धनिष्ठा-नगाड़ा की तरह, २४. शतभिषक्-तोरण की तरह,
भारनिभा (२५) भारसमा (२६) मीनाभा (२७) चेति सम्मता उड़वः।
काश्चित्-कैश्चित्-प्रोक्ता भिन्नाकृतयः स्व-शास्त्रेषु॥१८॥
२५. पूर्वभाद्रपद और २६. उत्तरभाद्रपद-दोनों भार (डण्डे के दोनों तरफ लटके) या मञ्च की तरह, २७. रेवती-मछली या नगाड़ा की तरह दीखता है। नक्षत्रों का आकार समस्तों के मत से समान नहीं है।
अश्वि (१) चन्द्र (५) बगे (११) न्द्राग्नि (१६) तोय (२०) विश्वा (२१) जपादजाः (२५)।
अहिर्बुध्नस्यो (२६) त्तरस्था योगतारा ध्रुवांशगाः॥१९॥
किस नक्षत्र का योगतारा कहां स्थित है, यह कहा जाता है। १. अश्विनी, ५. मृगशिरा, ११. पूर्वाफाल्गुनी, १६. विशाखा, २०. पूर्वाषाढ़, २१. उत्तराषाढ़, २५. पूर्वभाद्रपद, तथा २६. उत्तर भाद्रपद-इन नक्षत्रों का योगतारा नक्षत्र की उत्तर दिशा में है। इन्द्र (१८) गोविन्द (२२) मित्रा (१७) ग्नि (३) जीवानां (८) मध्यगा मताः।
आदित्या (७) दित्य (१३) दैत्याना (१९) मीशान-दिग-वस्थिताः॥२०॥
१८.ज्येष्ठा, २२. श्रवण, १७. अनुराधा, ३. कृत्तिका, ८. पुष्य-इन नक्षत्रों का योगतारा नक्षत्र के मध्य में है। ७. पुनर्वसु, १३. हस्त, १९. मूल-इनका योगतारा नक्षत्र के ईशान में है।
वित्त (२३) स्याभिजितः (०) पश्चात् पूर्वस्यां ब्रह्म (४) सर्पयोः (९)।
याम्या स्थूला पितुः (१०) पूष (२७) यमा (२) र्य्यम्णाश्च (१२) दक्षिणाः॥२१॥
२३. धनिष्ठा और अभिजित् (०) का योगतारा नक्षत्र के पश्चिम में है। ४. रोहिणी और ९. अश्लेषा का योगतारा पूर्व में है। १०, मघा का योगतारा अत्यन्त स्थूल है और नक्षत्र के दक्षिण में है। २७. रेवती, २. भरणी और १२. उत्तराफाल्गुनी का योगतारा नक्षत्र के दक्षिण में है।
कृपीटयोनि-काष्ठायां योगतारा प्रचेतसः (२४)। शङ्कर-त्वष्ट्-वातानां (१५) स्वरूपा-ण्येकभावतः॥२२॥
२४. शतभिषक् का योगतारा आग्नेय कोण में है। ६. आर्द्रा, १४. चित्रा और १५. स्वाती में एक ही तारा है, अतः इनके योगतारा और नक्षत्र-पुञ्ज में कोई अन्तर नहीं है। योगतारा का ही ध्रुव और शर नक्षत्र का ध्रुव और शर होता है।
योगतारा-विलिप्तास्तु सूक्ष्माः क्रमान्, मानतः षड् (६) भुजौ (२) वह्नयः (३) सप्तयः (७)।

ईक्षणे (२) क्ष्माभृतः (७) कुञ्जरा (८) लोचने (२) सिन्धवः (४) षड् (६) गुणा (३) वार्द्धय (४) श्चाब्धयः (४)॥२३॥
योगताराओं की सूक्ष्म बिम्ब-कला (विलिप्ता में) कही जाती है। १. अश्विनी (६), २. भरणि (२), ३. कृत्तिका (३), ४. रोहिणी (७), ५. मृगशिरा (२), ६. आर्द्रा (७), ७. पुनर्वसु (८), ८. पुष्य (२), ९. अश्लेषा (४), १०. मघा (६), ११. पूर्वाफाल्गुनी (३), १२. उत्तराफाल्गुनी (४), १३. हस्त (४),
सैन्धवा (७) स्त्री-न्दवः (१३) श्चक्षुषी (२) सिन्धवः (४) सप्त (७) पञ्चा (५) ब्धय (४) श्चाब्धयो (४) ऽब्धी-न्दवः (१४)।
वाजिनः (७) पावका (३) वीतिहोत्राः (३) कृता (४) अर्णवा (४) वह्नय (३) श्चेति दस्रादितः॥२४॥
१४. चित्रा (७), १५. स्वाती (१३), १६. विशाखा (२), १७. अनुराधा (४), १८. ज्येष्ठा (७), १९. मूल (५), २०. पूर्वाषाढ़ (४), २१. उत्तराषाढ़ (४), (०) अभिजित् (१४), २२. श्रवण (७), २३. धनिष्ठा (३), २४. शतभिषक् (३), २५. पूर्वभाद्रपद (४), २६. उत्तरभाद्रपद (४), २७. रेवती (३)।
देवमातुः (७) पुनर्याम्यगा तारका सर्व्व-तारा-धिका तद्-विलिप्ता नखाः (२०)।
तद्-ध्रुवः सप्त-सप्तां (७७) शका मार्गणः (५) खा-र्णवां (४०) शा निजा-पक्रमाद्-दक्षिणः॥२५॥
अन्य कई ताराओं का ध्रुव, बिम्बमानतथा शर दिया जा रहा है। ७. पुनर्वसु नक्षत्र के दक्षिण में सबसे उज्ज्वल एक तारा का बिम्ब-कला (२०), ध्रुव (७७) तथा ध्रुव-प्रोतीय क्रान्ति (४०) है।
सूर्य्यसिद्धान्त-वाक्या-दियं तारका लुब्धकाख्यो मुनिश्चेति निश्चीयते।
चेददित्यास्तदा याम्यगान्-वा लघु-स्तारका तत्-समीपेऽपि निर्णीयताम्॥२६॥
सूर्य्यसिद्धान्त के मत से इसे लुब्धक तारा कहा जाता है। एक और तारा भी (पुनर्वसु के दक्षिण में दीखता है जो लुब्धक नहीं है।
केचिदाहु-र्मृगव्याध-नामा मुनिः, सोमभा (५) द्याम्यग-स्तद्-ध्रुवोऽङ्गे-षवः (५६)।
याम्य-बाणो रदाः (३२) स्वापमा-दंशका दिग् (१०) विलिप्ताश्च तन्-मण्डलस्या-यतिः॥२७॥
कोई कोई आचार्य मृगव्याध नक्षत्र को मृगशिरा नक्षत्र के दक्षिण में मानते हैं। इसका ध्रुव ५६, दक्षिण शर ३२, तथा बिम्बमान १७ है।
तस्य चेशा (५) नभस्या (६) पि मध्य-स्थिता-स्तारका-स्तिस्र ईष्वाभका इल्वलाः।
एक-षष्टि (६१) र्ध्रुवः स्थूल-भस्यार्द्ध-युग्-वह्नि-पक्षाः (२३+१/२) शरो याम्य आसां मतः॥२८॥
यह मृगव्याध और आर्द्रा नक्षत्र के बीच में तीर के आकार के ३ तारा हैं। इनको इल्वल कहा जाता है। इनके बीच का योगतारा है जिसका ध्रुव (६१) और दक्षिण शर (२३/३०) है।
हुतभुग्-ब्रह्महृदययोः पक्षा-र्था (५२) ध्रुवश्च सौरोक्तः। प्रथमस्याष्टौ (८) त्रिंशद् (३०) द्वितीय-भस्यो-त्तरेष्वंशाः॥२९॥
हुतभुक् नक्षत्र का सूर्य्यसिद्धान्त के अनुसार ध्रुव (५२) और उत्तर शर (८) है। ब्रह्महृदय का भी सूर्य्यसिद्धान्त के अनुसार ध्रुव (५२) और उत्तर शर (३) है।
ब्रह्महृदय पूर्वस्यां पञ्चभि-रंशैः प्रजापति-र्वसति। तस्योत्तर विक्षेपः कुञ्जर-रामां (३८) शकोऽप्युदितः॥३०॥
ब्रह्महृदय से पूर्व ५° की दूरी पर प्रजापति नक्षत्र है, जिसका ध्रुव ५७° तथा उत्तर शर ४८° है। (सूर्य्यसिद्धान्त के अनुसार) आधुनिकै-रभियुक्तै-र्निश्चित्योक्तं पृथक् च संस्थानम्। हुतभुग्-ब्रह्महृदययोः प्रजापते-स्तत्-पुन-र्वच्मि॥३१॥
आधुनिक प्रत्यक्ष-दर्शी लोगों ने इन तारा का जो ध्रुव कहा है, वह मैं पुनः कहता हूँ।
हुतभुग्-ध्रुवः सपादा-ष्टा-र्था (५८/१५) शाः साङ्घ्रि-पञ्च (५/१५) सौम्य शरः।
षड्-विकला-स्तन्-मानं ध्रुवः पुन-र्ब्रह्महृदयस्य॥३२॥
हुतभुक् का ध्रुव ५८°१५', शर ५°१५' उत्तर तथा बिम्ब मान (६) है। ब्रह्महृदय का ध्रुव-
अङ्गा-र्थाः (५६) सौम्य-शर-स्त्रि-भुज (२३) लवा नृपा (१६) स्तनू-विकलाः।
सोमभ (५) याम्य-गतो यो लुब्धक एतत्-प्रजापति-भम्॥३३॥
५६° उत्तर शर २३° तथा बिम्बमान (१६) है। मृगशिरा नक्षत्र से दक्षिण के तारा को लुब्धक कहा गया था। उसे अब प्रजापति कहा जाता है।
त्वाष्ट्र (१४) स्यापांवत्सः पञ्च-लवान्ते वसत्युदम्-भागे। आप्यवसु-स्तत्-सौम्ये स्थूलः किञ्चित्-ततोऽङ्गां(६) शैः॥३४॥
१४. चित्रा तारा के उत्तर ६° की दूरी पर अपांवत्स तारा है। इसके उत्तर ६° की दूरी पर आप्य-वसु तारा है। यह कुछ बड़ा दीखता है। इसका अन्य नाम आप है। अपांवत्स और आप्यवसु-दोनों का ध्रुव चित्रा के समान है। अपांवत्स का उत्तर शर २°५०' तथा आप्यवसु का उत्तर शर (८°५०') है।

ध्रुवोऽगस्त्यस्य पञ्चाङ्क (९५) भागाः पञ्चा-द्रयः (७५) शरः (५)।
दक्षिण-स्तद्-ध्रुवो वामं चलांशैः संस्कृतः स्फुतः॥३५॥
अगस्त्य तारा का ध्रुव ९५° और दक्षिण शर ७५° है। इस अगस्त्य के ध्रुव का अयनांश संस्कार (धन होने पर जोड़ेंगे, ऋण होने से घटायेंगे) करने पर यह स्फुट होगा।
धृतयो (१८) विकलास्तस्य सूक्ष्म-मण्डल-विस्तृतिः।
यम-स्यैवं द्वि-पक्षां (२२) शा ध्रुवोऽङ्गा-ङ्गानि (६६) मार्गणः॥३६॥
अगस्त्य का बिम्ब (१८"), ध्रुव (२२°), दक्षिण शर (६६°),
याम्योऽष्टौ विकला बिम्बोऽगस्त्य-वद्-ध्रुव-संस्कृतिः। राशि-त्रय-मगस्त्यस्य ध्रुवः सौरोदितः पुरा॥३७॥
तथा बिम्ब मान (८") है। सूर्य सिद्धान्त में अगस्त्य तारा का ध्रुव ९०° कहा है (जब सत्य युग में अल्प या १३१ वर्ष बाकी था)।
सप्त-नागां (८७) शकः प्रोक्तः सत्-सिद्धान्त-शिरोमणौ। भू-शरा-क्षि-कृता (४२५१) ब्देषु कले-र्भास्कर-धीमता॥३८॥
कलि गताब्द (४२५१) में भास्कराचार्य ने सिद्धान्त शिरोमणि में अगस्त्य का ध्रुवांश ८७° कहा है।
स्वोक्ता-दिति (७) ध्रुवात् (९३) पश्चाद्-भाग-षट्का-न्तरे (८७) यतः।
दृष्टोऽसौ साम्प्रतं सार्द्ध-घनां (१७/३०) शान्तर ईक्ष्यते॥३९॥
(सिद्धान्त शिरोमणि में) पुनर्वसु का ध्रुव ९३° तथा अगस्त्य का उससे ६° कम अर्थात् ८७° कहा है। अभी सिद्धान्त दर्पण के समय (१८६८ ई. में) यह ७. पुनर्वसु से १७°३०' पीछे है। अर्थात् (९०°१५' - १७°३०' = ७२°४५')। अगस्त्य ध्रुव में चलांश २२° घटाने पर भी ७३° (प्रायः समान) आता है।
युग्मस्य विश्व (१३) भागान्ते तदब्दै-र्गो-कु-पर्वतैः (७१९)।
तस्य स्थानान्तरं सिद्धं सार्द्ध-रुद्रा-यनांशजम् (११/३०)॥४०॥
अगस्त्य का ८७° ध्रुव ११°३०' अयनांश (सिद्धान्त शिरोमणि के समय) था। अभी का मिथुन १३° (७३°) ध्रुव भास्कर के बाद ७१९ वर्षों में परिवर्तन है (१८६८ ई. में)।
सप्तर्षीणां ध्रुवं प्राग्भि-र्नोक्त-सञ्चार-सम्भवात्। तथा-प्यनुभवात्-तेषां व्यवस्था क्रियतेऽधुना॥४१॥
चलनशील होने के कारण सप्तर्षि मण्डल का ध्रुव पूर्वाचार्यों ने नहीं कहा है। तथापि अपने अनुभव के आधार पर इनकी स्थिति के बारे में मैं कहता हूँ।
पूर्व्वाग्रं शकटा-कार-मुदक्स्थ-मुडु-सप्तकम्। सुरर्षि-मण्डलं प्रोक्तं व्यक्तं विश्व-नमस्कृतम्॥४२॥
उत्तर दिशा में पूर्व से पश्चिम की तरफ शगड़ (बैल गाड़ी) की तरह सप्तर्षि मण्डल बहुत स्पष्ट दीखता है। संहिता तथा पुराणों में सप्तर्षि को जगद्-वन्द्य कहा गया है।
तत्-पूर्व्वोन्नत-रेखाग्रे मरीचिः पश्चिमे ततः। वसिष्ठोऽरुन्धती-युक्त-स्तत्-पश्चा-दङ्गिरा स्थितः॥४३॥
सप्तर्षि-मण्डल में पूर्व की तरफ जो उठी हुई रेखा दीखती है, उसके आगे मरीचि का स्थान है। मरीचि के पीछे वसिष्ठ अरुन्धती के साथ हैं। वसिषठ के पश्चिम अङ्गिरा है।
तत्-पश्चा-च्चतुरस्रस्य शम्भु-दिश्य-त्रि-रस्य च। पुलस्त्यो दक्षिणे तस्य पश्चिमे पुलहः स्थितः॥४४॥
उसके बाद जो चतुर्भुज है, उसके ईशान कोण में अत्रि हैं। अत्रि के दक्षिण पुलस्त्य और पुलस्त्य के दक्षिण पुलह स्थित है।
क्रतु-स्तदुत्तर-स्थान-स्तत्रोक्तौ पुलहः क्रतुः। ध्रुव-सूत्रेण यल्लग्नौ तदृक्षस्था महर्षयः॥४५॥
पुलह के उत्तर में क्रतु है। पुलह और क्रतु को मिलानेवाला ध्रुव-प्रोत वृत्त क्रान्ति वृत्त को जिस स्थान पर काटेगा, उसी नक्षत्र या राशि में सप्तर्षि मण्डल को माना जायेगा।
कथ्यन्ते साम्प्रतं सिंहे भू-भुजां (२१) शान्तगौ स्थितौ। कालांशै-र्विश्वकैः (१३) प्राच्यां पुलस्त्यो वर्त्तते ततः॥४६॥
अभी पुलह और क्रतु सिंह राशि के २१° अंश पर या पूर्वाफाल्गुनी नक्षत्र के तृतीय पाद में है। पुलह और क्रतु से १३ कालांश पूर्व में पुलस्त्य है।
ततस्तैः सायकै (५) रत्रि-रङ्गिरा नवभि-स्ततः। ततोऽष्टाभि (८) र्वसिष्ठोऽस्मान् मरीचि-र्वर्त्ततेऽषटभिः (८)॥४७॥
पुलह से ५ कालांश पूर्व में अत्रि, अत्रि से ९ कालांश पूर्व अङ्गिरा, अङ्गिरा से ८ कालांश पूर्व वसिष्ठ तथा वसिष्ठ से ८ कालांश पूर्व मरीचि है।
अरुन्धती स्थिता प्राच्यां स्वामिनोऽद्रि (७) कलान्तरे। या वसिष्ठा-ति-नेदिष्ठा यन्त्र-दृष्टा-रेततः॥४८॥

अरुन्धती वसिष्ठ से ७ कालांश पूर्व, वसिष्ठ के बहुत निकट बहुत छोटा तारा है जो आंख से कठिनाई से दीखता है, या यन्त्र द्वारा दीखता है।
सा नेष्टा सदसद्-दृष्टि-फलोक्तेः प्रथमेष्यते। एकास्या मान-विकला तिस्रोऽत्रे-रष्ट चान्यतः॥४९॥
यह शुभ या अशुभ फलदायक नहीं है। पहले जो कहा गया है (वसिष्ठ से ७ कला पूर्व) वही अरुन्धती फलदायक है। इसका बिम्ब मान १ विकला है। अत्रि का बिम्ब ३ विकला और बाकी सभी तारों (सप्तर्षि मण्डल में) बिम्ब मान ८ विकला है।
परस्परस्य चैतेषां सदा तुल्यान्तर-स्थितेः। गृह्यन्ता-मृक्ष-योगेषु कालांशा दिक् (१०) पलात्मकाः॥५०॥
इन तारा-गणों की दूरी परस्पर समान है। अतः इनका कालांश १० पल है।
तेऽष्टादश-शता-भ्यस्ता व्यक्ष-लग्ना-सुभि-र्हृताः। प्राग्-ध्रुवाढ्या भवन्तीष्ट-मुनि-क्रान्त-गृहांशकाः॥५१॥
इस १० पल को १८०० से गुणा कर निरक्ष उदय (लग्न मान) असु से भाग देने पर जो लब्धि होगी उसे पुलह और क्रतु के पूर्वोक्त ध्रुव (सिंह २१°) में जोड़ने से ऋषि नक्षत्र का राशि आदि ध्रुव होगा।
सप्तर्षि-मण्डलायाम-स्त्र्य-ब्धि (४३) कालांशकोऽपि यत्।
सायनांश-तुला-कन्या-स्थित्या-ङ्गा-ब्ध्यंश (४६) ईक्ष्यते॥५२॥
सप्तर्षि मण्डल की पूर्व से पश्चिम दिशा में लम्बाई ४३ कालांश होने पर भी सायन कन्या और तुला राशि में उसकी स्थिति के कारण यह लम्बाई (४६°) अंश दीखती है।
क्रान्त्यन्ता सौम्य-बाणांशा लिख्यन्तेऽङ्ग-शराः (५६) क्रतोः।
पुलह-स्यैक-पञ्चाशत् (५१) पुलस्त्य-स्याग्नि-सायकाः (५३)॥५३॥
क्रतु का क्रान्तिवृत्त से ह्रुव-प्रोत वृत्त पर उत्तर शर (५६°) अंश है। पुलह का (५१°) तथा पुलस्त्य का (५३°) है।
अङ्क-पत्रिण (५९) एवात्रेः षष्टि (६०) रङ्गिरसो मता।
द्वा-षष्ट्यंशा (६२) वसिष्टस्य मरीचेः षष्टि (६०) रीक्षिता॥५४॥
अत्रि का (५९°), अङ्गिरा का (६०°), वसिष्ठ का (६२°) और मरीचि का (६०°) उत्तर शर दीखता है।
सर्व्वदायं शर-क्रान्ते यदि तुल्यो भवेत्तदा। युग्मान्तस्य-वसिष्ठस्या-च्चतु-र्भागान्तरो ध्रुवात्॥५५॥
यदि क्रान्ति वृत्त से वसिष्ठ का शर सर्वदा समान रहे, तो यह युग्मान्त (मिथुन अन्त) में रहने के कारण ध्रुव से ४° पर होगा। वसिष्ठ का उत्तर या सौन्य शर ६२, युग्मान्त की क्रान्ति २४°, कुल ८६°, अतः ध्रुव ९०° से अन्तर ४° हुआ।
स्फुट-क्रान्ति-र्महर्षीणां तुल्यता यदि सर्व्वदा। तदा राश्यन्तर-प्राप्तौ विक्षेपो भिन्नतां व्रजेत्॥५६॥
सप्तर्षियों में प्रत्येक की स्फुट क्रान्ति सदा समान रहने पर भी वे अन्य राशि में जाने पर उनका शर बदलता है।
यमा-गस्त्य-स्फुअट-क्रान्ते-र्यथा साम्यं सदेक्ष्यते। दस्रा-दीनाञ्च वैषम्यं तथैषां नेक्षितोऽपमः॥५७॥
यम और अगस्त्य की स्फुट क्रान्ति सदा समान होती है। अश्विनी आदि नक्षत्रों की क्रान्ति सदा बदलती रहती है। सप्तर्षि-मण्डल की क्रान्ति कभी सम कभी असमान होती है।
प्रत्यब्दं प्राग्-गतिः प्रोक्ता पुराणै-रष्ट-लिप्तिका। तेषां नो निविता पूर्व्वा-नुभवा-दर्शनान्-मया॥५८॥
पूर्व आचार्यों ने सप्तर्षि-मण्डल की पश्चिम से पूर्व गति वर्ष में ८ कला मानी है। पर मैंने (लेखक ने) यह गति नहीं देखी है। अतः इसे नहीं मानता हूँ।
तथा-यनांश-संस्कारो वाम-स्तेषां यदीरितः। तत्-सर्व्वं कविभि-र्भाव्यै-र्ज्ञेयं मत्-कालिक-स्थितेः॥५९॥
यम, अगस्त्य और सप्तर्षि मण्डल का अयन-संस्कार ध्रुव के विपरीत दिशा में करने के लिये कहा गया है। वह मेरे समय (१८६८ ई.) के लिये है।
लिप्ता तिथ्यं (१५) शमानः खे यत्र राजत्यु-दग्-ह्रुवः। न तन्-मध्य-ध्रुव-स्थानं सूत्र-पातार्ह-मिष्यते॥६०॥
ध्रुव तारा (उत्तर) का बिम्ब मान लिप्ता का १/१५ भाग (४ विकला) है। उत्तर ध्रुव तारा का स्थान वास्तविक ध्रुव नहीं है। अतः यह विषुव वृत्त का केन्द्र नहीं है। ध्रुव-प्रोत वृत्त इससे नहीं खींचा जाता है।
कृता-ष्ट (८४) लिप्ता-न्तरितो निज-केन्द्राद्-यतो ध्रुवः। मेषा-दिस्थो भ्रम-त्यस्मात् पौष्ण-भे (२७) गगना-द्धगे॥६१॥
दृश्य ध्रुव तारा नाड़ी-वृत्त के पृष्ठ-केन्द्र (गणितीय ध्रुव) से लिप्ता (१°२५') की दूरी पर है। अतः रेवती नक्षत्र याम्योत्तर-वृत्त पर आने से ध्रुवतारा मेषादि में रह कर याम्योत्तर-वृत्त पर ८४ कला नत दीखता है।
उन्नतो दृश्यते विष्णौ (२२) दित्यां (७) चाक्ष-समीच्छ्रितः। त्वाष्ट्रे (१४) नत-स्ततो मध्य-स्थान-मस्या-नुमीयताम्॥६२॥
श्रवण, पुनर्वसु याम्योत्तर-वृत्त पर रहने के समय, यह ध्रुव नक्षत्र दिग्वलय से अपने अक्षांश के बराबर उन्नत दीखता है। पुनः चित्रा नक्षत्र याम्योत्तर-वृत्त पर आने से ध्रुव अपने केन्द्र से ८४ कला नत दीखता है।
एवं याम्य-ध्रुवो मेधि-मूल-योजित-गौरिव। तुला-दिस्थो भ्रम-न्नभ्रे दृश्येता-सुर-भागगैः॥६३॥

इसी प्रकार दक्षिण ध्रुव भी दक्षिण गोलार्द्ध के लोगों को वास्तविक ध्रुव केन्द्र के चारों तरफ मेढ़ी के बैल की तरह घूमता दीखता है।
अंशास्तु त्रिविधा ज्ञेया मानांशाः कालजां-शकाः। क्षेत्रांशा-श्चेति लग्नानां भेदात्तौ क्षेत्र-कालजौ॥६४॥
अंश ३ प्रकार के हैं-मानांश, कालांश, और क्षेत्रांश। राशियों का उदय मान भिन्न-भिन्न होने के कारण क्षेत्रांश और कालांश-
अंशौ विभिन्नौ भवत-श्चक्रान्ते सङ्ख्यया (३६) समौ। मान-कालांशयो साम्यं क्रमोना-वागुदङ्-मितेः॥६५॥
-भिन्न-भिन्न होते हैं। पर चक्र समाप्त होने पर इन दोनों का मान ३६०° होता है। मानांश और कालांश का मान विषुव वृत्त में समान होता है, पर-
महत्-तदन्तर-मेव स्यात्-तदुदग्-याम्य-भागयोः। प्राक्-पश्चिमान्तर-स्यायं क्रमोना-वागुदङ्-मितेः॥६६॥
विषुव से उत्तर या दक्षिण जाने पर कालांश और मानांश में बहुत अन्तर होगा। सप्तर्षि-मण्डल के तारों का क्रम पूर्व-पश्चिम दिशा स्थिति (देशान्तर के अनुसार) लिया जाता है (सबसे पश्चिम का पहला तारा आदि)। यह उत्तर-दक्षिण दिशा (अक्षांश के क्रम में नहीं लिया जाता।
यथात्र पुलह-क्रत्वोः सौम्य-याम्या-न्तरं शराः (५)। भागा एव समा दृष्टा मरीच्यन्तं क्रतोः पुनः॥६७॥
जिस प्रकार पुलह और क्रतु का शरान्तर (ध्रुव-प्रोतीय वृत्तान्तर) सदा ५° मात्र रहता है, उसी प्रकार क्रतु और मरीचि का पूर्व-पश्चिम अन्तर-
प्राक्-पश्चा-दन्तरे दृष्टा मानांशा-स्तत्त्व (२५) सङ्ख्यकाः।
सार्द्धा (०/३०) स्तत्तत् शरांशेभ्य-स्तयोः साध्यौ स्फुटा-पमौ॥६८॥
मानांश २५° तथा शरांश २५°३०' है। इससे पूर्व विधि से स्फुट क्रान्ति का साधन किया जा सकता है।
दिन-व्यास-दले प्राग्वत् तद्-योगार्द्धं हृति-र्भवेत्। मानांशा-स्त्रिज्यया-भ्यस्ता हृताप्ताः क्षेत्रजांशकाः॥६९॥
स्फुट क्रान्ति द्वारा द्युज्या का साधन होगा। दोनों द्युज्या (क्रान्ति-वृत्तीय और विषुव-वृत्तीय) का योगार्द्ध हार कहलाता है। मानांश को त्रिज्या से गुणा कर हार से भाग देने पर प्राप्त फल क्षेत्रांश (क्रान्ति-वृत्तीय अंश) होगा।
स्युस्ते लग्ना सुगणिताः ख-ख-नाग-मही (१८००) हृताः। कालांशाः स्युस्ततो मान-भागा व्युत्क्रम-कर्म्मतः॥७०॥
क्षेत्रांश को राशि के उदयासु से गुणा कर (१८००) से भाग देने पर फल कालांश होता है। इस प्रकार मरीचि और क्रतु का कालांश आयेगा। विपरीत क्रिया से इस क्रिया द्वारा कालांश से मानांश निकलेगा।
एवं ध्रुव-भ्रान्ति-मार्गः खा-ङ्गा-ग्नि (३६०) क्षेत्र-भागकः।
अप्य-ष्टा-म्बुधि-लिप्ताश्च-वसु (८/४८) मानांश-सम्मितः॥७१॥
ध्रुव क्षेत्र के भ्रमण मार्ग का वृत्त ३६०° अंश होने से उसका मानांश (३६० x ८४)/३४३८ = ८'४८" मात्र है।
क्रान्ति-भेदे महर्षीणा-माकृतेः समता यदि।
स्यात् तदा-न्तर-कालांशाः क्रान्त्य-ल्पत्व-महत्त्वयोः॥७२॥
क्रान्ति बदलने पर सप्तर्षियों का आकार यदि स्थिर रहता है (क्रान्ति के साथ नहीं बदलता) तो क्रान्ति कम या अधिक होने पर-
क्रमा-दल्पाश्च भूयांसो भवेयु-र्द्युगण-क्रमात्।
कालांशा-न्तर-मेतेषां क्रान्ति-भेदे यदि स्थिरम्॥७३॥
उदयान्तर भी कम या अधिक होता है (क्रमानुसार द्युज्या अधिक या कम होने के कारण)। यदि क्रान्ति भेद होने पर सप्तर्षि ताराओं का कालान्तर स्थिर रहता है-
तदा-क्रऋते-र्हानि-वृद्धी स्याता-मृक्षान्तरांश-वत्।
स्थिरा क्रान्ति-र्यदैषां स्यात् कालांशाः स्यु-स्तदा स्थिराः॥७४॥
- तो क्रान्ति कम या अधिक होने पर तारा का पूर्व-पश्चिम अन्तर कम या अधिक अक्षांश अन्तर के समान होता है। यदि ताराओं की क्रान्ति स्थिर हो तो उनका कालांश भी स्थिर रहेगा।
क्षेत्रांशानां स्थिरत्वे स्यात् काल-मानाल्प भूरिता।
क्षेत्र मानांशयोः सिद्धिः कालभागांशयोरिव॥७५॥
क्षेत्रांश स्थिर रहने पर कालांश के साथ मानांश कम या अधिक होगा। कालांश और भागांश के समान ही कालांश और मानांश का परसपर सम्बन्ध निकलेगा।
नक्षत्राणां ध्रुवांशा ये ते कृता-यन-दृक्-क्रियाः।
उदिता एव विज्ञेया विक्षेपाश्च तथा स्फुटाः॥७६॥

यहां नक्षत्रों का जो ध्रुवांश दिया गया है, उसमें आयन दृक्-कर्म संस्कार किया हुआ है। इनका शर भी स्फुट अर्थात् ध्रुव प्रोत वृत्तीय है।

ग्रहाणा-मस्फुटो बाणः कदम्बा-भिमुख-स्थितः।
दृक्-कर्म्मणा ध्रुव-मुखः स्फुटः स्यात्-तारके-षु-वत्॥७७॥

ग्रहों का अस्फुट शर कदम्ब-प्रोत वृत्त में है। इसका दृक्-कर्म संस्कार करने से वह ध्रुव-मुख अर्थात् ध्रुव-प्रोत वृत्तीय होगा। जिस प्रकार ताराओं का स्फुट शर होता है।

प्राक्-पश्चा-च्चलनाद्-भानां क्रान्त्यन्तात् शर-साम्यतः।
क्रान्ति-भेद-स्ततो रात्रि-दिन-मानं पृथग्-भवेत्॥७८॥

क्रान्ति वृत्त से नक्षत्रों का कदम्ब प्रोतीय शर समान होने पर भी उनके पूर्व पश्चिम तल के कारण(ध्रुव प्रोतीय) क्रान्ति भिन्न होगी। अतः उनके दिन और रात्रि का मान भिन्न होगा।

यस्य सौम्या स्फुत-क्रान्ति-र्लम्बांशेभ्योऽधिका स्वतः।
तद्-भं सदो-दितं यस्य याम्या स्यात् तत्र दृश्यते॥७९॥

जिस नक्षत्र की स्फुट क्रान्ति अपने स्थान के लम्बांश से अधिक हो वह नक्षत्र वहां सदा उदित होगा (वहां उक्त नक्षत्र सदा दिखाई देगा)। उस नक्षत्र की दक्षिण स्फुट क्रान्ति लम्बांश से अधिक होने पर वह नक्षत्र उस स्थान पर सदा अस्त रहेगा, अर्थात् कभी दिखाई नहीं देगा।

ग्रहा-र्क्षा-न्तरजा लिप्ता ग्रह-भुक्त्या विभाजिताः।
दिनादिभिः फलै-र्योगो ग्रहे हीनेऽधिके ध्रुवात्॥८०॥

जिसग्रह का किसी नक्षत्र के साथ योग जानना हो उस ग्रह का आयन दृक्-कर्म संस्कार कर उसका और नक्षत्र के ध्रुव का अन्तर निकालते हैं। ग्रह नक्षत्र की अन्तर कला को ग्रह की स्फुट गति कला से भाग दे कर लब्धि दिन आदि होगी। ग्रह ध्रुव, नक्षत्र ध्रुव से कम होने पर उतने दिनों बाद योग होगा। ध्रुव से अधिक होने पर-

एष्यो गतो वक्रगे तो गतैष्यत्व-विपर्ययात्।
असकृत्-कर्म्मणा तुल्य-फले स्यातां ग्रहो-ड्डुनी॥८१॥

-उतने समय (दिन आदि) पहले योग हो चुका है। ग्रह वक्री होने पर ग्रह-नक्षत्र योग का क्रम उलटा होगा (ग्रह से नक्षत्र ध्रुव कम रहने पर उतने समय पहले योग हुआ, अधिक रहने पर बाद में योग होगा)। योग समय का स्फुट ग्रह और ध्रुव के अन्तर का पुनः अन्तर काल निकाल कर फिर योग काल निकालेंगे। बार बार ऐसा करने से ग्रह और नक्षत्र की कला समान होती है।

ग्रहस्या-यन-दृक्-कर्म्म कृत्वाथ ग्रह-तारयोः।
कार्य्ये दिन-निशा-माने स्फुत-क्रान्ति-चर-क्रमात्॥८२॥

इसके बाद ग्रह और नक्षत्र की अपनी अपनी स्फुट क्रान्ति और चर निकाल कर दिन और रात्रि मान का साधन होगा।

उदयेऽस्त-मये लग्न-मस्य्त-लग्नं प्रकल्प्य च।
तत्-समेऽर्के तदु-दय-मस्तं ज्ञात्वा-न्तरांशकैः॥८३॥

